श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितम्

# ॥ श्रीलक्ष्मीहयवदन सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयवदन सुप्रभातम् ॥

वेधोमुखैर्विधिवदर्चितपादपद्म
    वेदप्रदान परिकर्मित हस्तपद्म।
विश्वानुपालनकृतक्षणनेत्रपद्म
    लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ १ ॥

यद्वेधसां प्रथमशिक्षणमन्वतानीः
    वेधोऽवलेपविहतिं पुनरभ्यकार्षीः।
अत्यादरात्पुनरिहागतवान् मदर्थे
    लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ २ ॥

निद्रातुरे जगति नीचपथप्रवृत्ते
    नेत्रे निमील्य निगमाध्वनि निर्विशङ्के।
निद्रां जहि त्वम् अधुना मधुबोधनार्थं
    लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ३ ॥

त्वां माधवं मधुभिदं बहुमानमेयं
    मध्वाशया मधुलिहो बहुभागधेयम्।
भोक्तुं गृणन्ति मधुमत्तमजिह्विया द्राक्
    लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ४ ॥

श्रुत्या श्रिया समुपसेवितदिव्यरूप
    स्मृत्यादिभिः समुपबृंहितदिव्यनामन्।
भक्तिप्रपत्तिपरिपोषितदिव्यतेज
    लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ५ ॥

हेषारव श्रुतिरिति श्रुतमात्मविद्भिः
    हेषां तवानुभवितुं श्रुतिमुद्गृणन्ति।

www.prapatti.com

श्रुत्वाद्य जागृहि मयाप्रति बोधितस्सन्
लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ६ ॥

साम्यं ददासि परमं त्वदुपासकानां
वेदान्तदेशिकगुरौ प्रतिपन्नमेतम्।
व्याख्यानकौशलकरं श्रुतिपुस्तकं च
लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ७ ॥

वेदान्तदेशिकगुरुस्तव पूजनाय
त्वत्पादपङ्कज समर्पितसर्वभारः।
आस्तेधि सात्विकगणैर्मणिमण्डपं ते
लक्ष्मीहयास्य भगवन् तव सुप्रभातम्॥ ८ ॥

॥ इति श्रीलक्ष्मीहयवदन सुप्रभातं संपूर्णम्॥

www.prapatti.com